# Jnanasya Mokshahetutvavarnanam

# જ્ઞાનસ્ય મોક્ષહેતુત્વવર્ણનમ્

## Document Information

Text title : Jnanasya Mokshahetutva Varnanam

File name : jnAnasyamokShahetutvavarNanam.itx

Category : devii, advice, misc

Location : doc_devii

Transliterated by : Vishwas Bhide

Proofread by : Vishwas Bhide, PSA Easwaran

Description/comments : Devigita Adhyaya 3

Acknowledge-Permission: http://satsangdhara.net

Latest update : April 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 1, 2021

*sanskritdocuments.org*

# જ્ઞાનસ્ય મોક્ષહેતુત્વવર્ણનમ્

(દેવીભાગવતતઃ દેવીગીતાયાં તૃતીયોઽધ્યાયઃ)

શ્રીદેવ્યુવાચ -
ક્વ યૂયં મન્દભાગ્યા વૈ ક્વેદં રૂપં મહાદ્ભુતમ્ ।
તથાપિ ભક્તવાત્સલ્યાદીદૃશં દર્શિતં મયા ॥ ૧॥

ન વેદાધ્યયનૈર્યોગૈર્ન દાનૈસ્તપસેજ્યયા ।
રૂપં દ્રષ્ટુમિદં શક્યં કેવલં મત્કૃપાં વિના ॥ ૨॥

પ્રકૃતં શ‍ૃણુ રાજેન્દ્ર પરમાત્માત્ર જીવતામ્ ।
ઉપાધિયોગાત્સમ્પ્રાપ્તઃ કર્તૃત્વાદિકમપ્યુત ॥ ૩॥

ક્રિયાઃ કરોતિ વિવિધા ધર્માધર્મૈકહેતવઃ ।
નાના યોનીસ્તતઃ પ્રાપ્ય સુખદુઃખૈશ્ચ યુજ્યતે ॥ ૪॥

પુનસ્તત્સંસ્કૃતિવશાન્નાનાકર્મરતઃ સદા ।
નાનાદેહાન્સમાપ્નોતિ સુખદુઃખૈશ્ચ યુજ્યતે ॥ ૫॥

ઘટીયન્ત્રવદેતસ્ય ન વિરામઃ કદાપિ હિ ।
અજ્ઞાનમેવ મૂલં સ્યાત્તતઃ કામઃ ક્રિયાસ્તતઃ ॥ ૬॥

તસ્માદજ્ઞાનનાશાય યતેત નિયતં નરઃ ।
એતદ્ધિ જન્મસાફલ્યં યદજ્ઞાનસ્ય નાશનમ્ ॥ ૭॥

પુરુષાર્થસમાપ્તિશ્ચ જીવન્મુક્તદશાપિ ચ ।
અજ્ઞાનનાશને શક્તા વિદ્યૈવ તુ પટીયસી ॥ ૮॥

ન કર્મ તજ્જં નોપાસ્તિર્વિરોધાભાવતો રે ।
પ્રત્યુતાશાજ્ઞાનનાશે કર્મણા નૈવ ભાવ્યતામ્ ॥ ૯॥

અનર્થદાનિ કર્માણિ પુનઃ પુનરુશન્તિ હિ ।
તતો રાગસ્તતો દોષસ્તતોઽનર્થો મહાન્ભવેત્ ॥ ૧૦॥

તસ્માત્સર્વપ્રયત્નેન જ્ઞાનં સમ્પાદયેન્નરઃ ।
કુર્વન્નેવેહ કર્માણીત્યતઃ કર્માપ્યવશ્યકમ્ ॥ ૧૧॥

જ્ઞાનાદેવ હિ કૈવલ્યમતઃ સ્યાત્તત્સમુચ્ચયઃ ।
સહાયતાં વ્રજેત્કર્મ જ્ઞાનસ્ય હિતકારિ ચ ॥ ૧૨॥

ઇતિ કેચિદ્વદન્ત્યત્ર તદ્વિરોધાન્ન સમ્ભવેત્ ।
જ્ઞાનાદ્ધૃદ્ગ્રન્થિભેદઃ સ્યાદ્ધૃદ્ગ્રન્થૌ કર્મસમ્ભવઃ ॥ ૧૩॥

યૌગપદ્યં ન સમ્ભાવ્યં વિરોધાત્તુ તતસ્તયોઃ ।
તમઃ પ્રકાશયોર્યદ્વદ્યૌગપદ્યં ન સમ્ભવિ ॥ ૧૪॥

તસ્માત્ સર્વાણિ કર્માણિ વૈદિકાનિ મહામતે ।
ચિત્તશુદ્ધ્યન્તમેવ સ્યુસ્તાનિ કુર્યાત્પ્રયત્નતઃ ॥ ૧૫॥

શમો દમસ્તિતિક્ષા ચ વૈરાગ્યં સત્ત્વસમ્ભવઃ ।
તાવત્પર્યન્તમેવ સ્યુઃ કર્માણિ ન તતઃ પરમ્ ॥ ૧૬॥

તદન્તે ચૈવ સંન્યસ્ય સંશ્રયેદ્ગુરુમાત્મવાન્ ।
શ્રોત્રિયં બ્રહ્મનિષ્ઠં ચ ભક્ત્યા નિર્વ્યાજયા પુનઃ ॥ ૧૭॥

વેદાન્તશ્રવણં કુર્યાન્નિત્યમેવમતન્દ્રિતઃ ।
તત્ત્વમસ્યાદિવાક્યસ્ય નિત્યમર્થં વિચારયેત્ ॥ ૧૮॥

તત્ત્વમસ્યાદિ વાક્યં તુ જીવબ્રહ્મૈક્યબોધકમ્ ।
ઐક્યે જ્ઞાતે નિર્ભયસ્તુ મદ્રૂપો હિ પ્રજાયતે ॥ ૧૯॥

પદાર્થાવગતિઃ પૂર્વં વાક્યાર્થાવગતિસ્તતઃ ।
તત્પદસ્ય ચ વાક્યાર્થો ગિરેઽહં પરિકીર્તિતઃ ॥ ૨૦॥

ત્વં પદસ્ય ચ વાચ્યાર્થો જીવ એવ ન સંશયઃ ।
ઉભયોરૈક્યમસિના પદેન પ્રોચ્યતે બુધૈઃ ॥ ૨૧॥

વાચ્યાર્થયોર્વિરુદ્ધત્વાદૈક્યં નૈવ ઘટેત હ ।
લક્ષણાતઃ પ્રકર્તવ્યા તત્ત્વમોઃ શ્રુતિસંસ્થયોઃ ॥ ૨૨॥

ચિન્માત્રં તુ તયોર્લક્ષ્યં તયોરૈક્યસ્ય સમ્ભવઃ ।
તયોરૈક્યં તથા જ્ઞાત્વા સ્વાભેદેનાદ્વયો ભવેત્ ॥ ૨૩॥

દેવદત્તઃ સ એવાયમિતિવલ્લક્ષણા સ્મૃતા ।
સ્થૂલાદિ દેહરહિતો બ્રહ્મ સમ્પદ્યતે નરઃ ॥ ૨૪॥

પઞ્ચીકૃતમહાભૂતસમ્ભૂતઃ સ્થૂલદેહકઃ ।
ભોગાલયો જરાવ્યાધિસંયુતઃ સર્વકર્મણામ્ ॥ ૨૫॥

મિથ્યાભૂતોઽયમાભાતિ સ્ફુટં માયામયત્વતઃ ।
સોઽયં સ્થૂલ ઉપાધિઃ સ્યાદાત્મનો મે નગેશ્વર ॥ ૨૬॥

જ્ઞાનકર્મેન્દ્રિયયુતં પ્રાણપઞ્ચકસંયુતમ્ ।
મનોબુદ્ધિયુતં ચૈતત્સૂક્ષ્મં તત્કવયો વિદુઃ ॥ ૨૭॥

અપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્મદેહોઽયમાત્મનઃ ।
દ્વિતીયોઽયમુપાધિઃ સ્યાત્સુખાદેરવબોધકઃ ॥ ૨૮॥

અનાદ્યનિર્વાચ્યમિદમજ્ઞાનં તુ તૃતીયકઃ ।
દેહોઽયમાત્મનો ભાતિ કારણાત્મા નગેશ્વર ॥ ૨૯॥

ઉપાધિવિલયે જાતે કેવલાત્માવશિષ્યતે ।
દેહત્રયે પઞ્ચકોશા અન્તઃસ્થાઃ સન્તિ સર્વદા ॥ ૩૦॥

પઞ્ચકોશપરિત્યાગે બ્રહ્મપુચ્છં હિ લભ્યતે ।
નેતિનેતીત્યાદિવાક્યૈર્મમ રૂપં યદુચ્યતે ॥ ૩૧॥

ન જાયતે મ્રિયતે તત્કદાચિ-
    ન્નાયં ભૂત્વા ન બભૂવ કશ્ચિત્ ।
અજો નિત્યઃ શાશ્વતોઽયં પુરાણો
    ન હન્યતે હન્યમાને શરીરે ॥ ૩૨॥

હતં ચેન્મન્યતે હન્તું હતશ્ચેન્મન્યતે હતમ્ ।
ઉભૌ તૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૩૩॥

અણોરણીયાન્મહતો મહીયા-
    નાત્માસ્ય જન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતુઃ પશ્યતિ વીતશોકો
    ધાતુઃ પ્રસાદાન્મહિમાનમસ્ય ॥ ૩૪॥

આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ૩૫॥

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાંસ્તેષુ ગોચરાન્ ।

આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મનીષિણઃ ॥ ૩૬॥

યસ્ત્વવિદ્વાન્ભવતિ ચામનસ્કશ્ચ સદાઽશુચિઃ ।
ન તત્પદમવાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૩૭॥

યસ્તુ વિજ્ઞાનવાન્ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૩૮॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ મદીયં યત્પરં પદમ્ ॥ ૩૯॥

ઇત્થં શ્રુત્વા ચ મત્વા ચ નિશ્ચિત્યાત્માનમાત્મના ।
ભાવયેન્મામાત્મરૂપાં નિદિધ્યાસનતોઽપિ ચ ॥ ૪૦॥

યોગવૃત્તેઃ પુરા સ્વસ્મિન્ભાવયેદક્ષરત્રયમ્ ।
દેવીપ્રણવસઙ્જ્ઞસ્ય ધ્યાનાર્થં મન્ત્રવાચ્યયોઃ ॥ ૪૧॥

હકારઃ સ્થૂલદેહઃ સ્યાદ્રકારઃ સૂક્ષ્મદેહકઃ ।
ઈકારઃ કારણાત્માસૌ હ્રીઙ્કારોઽહં તુરીયકમ્ ॥ ૪૨॥

એવં સમષ્ટિદેહેઽપિ જ્ઞાત્વા બીજત્રયં ક્રમાત્ ।
સમષ્ટિવ્યષ્ટ્યોરેકત્વં ભાવયેન્મતિમાન્નરઃ ॥ ૪૩॥

સમાધિકાલાત્પૂર્વં તુ ભાવયિત્વૈવમાદૃતઃ ।
તતો ધ્યાયેન્નિલીનાક્ષો દેવીં માં જગદીશ્વરીમ્ ॥ ૪૪॥

પ્રાણાપાનૌ સમૌ કૃત્વા નાસાભ્યન્તરચારિણૌ ।
નિવૃત્તવિષયાકાઙ્ક્ષો વીતદોષો વિમત્સરઃ ॥ ૪૫॥

ભક્ત્યા નિર્વ્યાજયા યુક્તો ગુહાયાં નિઃસ્વને સ્થલે ।
હકારં વિશ્વમાત્માનં રકારે પ્રવિલાપયેત્ ॥ ૪૬॥

રકારં તૈજસં દેવમીકારે પ્રવિલાપયેત્ ।
ઈકારં પ્રાજ્ઞમાત્માનં હ્રીઙ્કારે પ્રવિલાપયેત્ ॥ ૪૭॥

વાચ્યવાચકતાહીનં દ્વૈતભાવવિવર્જિતમ્ ।
અખણ્ડં સચ્ચિદાનન્દં ભાવયેત્તચ્છિખાન્તરે ॥ ૪૮॥

ઇતિ ધ્યાનેન માં રાજન્ સાક્ષાત્કૃત્ય નરોત્તમઃ ।
મદ્રૂપ એવ ભવતિ દ્વયોરપ્યેકતા યતઃ ॥ ૪૯॥

યોગયુક્ત્યાનયા દૃષ્ટ્વા મામાત્માનં પરાત્પરમ્ ।
અજ્ઞાનસ્ય સકાર્યસ્ય તત્ક્ષણે નાશકો ભવેત્ ॥ ૫૦॥

ઇતિ દેવીભાગવતે સપ્તમસ્કન્ધેદેવીગીતાયાં
ચતુસ્ત્રિંશાધ્યાયાન્તર્ગતં જ્ઞાનસ્ય મોક્ષહેતુત્વવર્ણનં સમાપ્તમ્ ।
ઇતિ શ્રીદેવીભાગવતે દેવીગીતાયાં તૃતીયોઽધ્યાયઃ ।

Encoded by Vishwas Bhide

Proofread by Vishwas Bhide, PSA Easwaran

---

*Jnanasya Mokshahetutvavarnanam*

pdf was typeset on May 1, 2021

Please send corrections to *sanskrit@cheerful.com*